248sk18

# १८

# कवचकुण्डलदानम्

## प्रस्तावना

पूर्वस्मिन् पाठे विषयः आसीत् यत् कर्णः अस्त्राणि लब्धुं परशुरामं समुपगच्छति। परन्तु यद्यपि सः अस्त्रविद्यां लब्धवान् तथापि गुरोः शापमपि लब्धवान्। अतः इदं दुःखं तस्य अन्तःकरणे अस्ति एव। तथापि तस्य समीपे कवचकुण्डले स्तः। अतः अपि सः अजेयः अस्ति। परन्तु कर्णः दानवीरः इति भारतस्य इतिहासे सुप्रसिद्धम् अस्ति। स स्वस्य प्राणभयं जानन् अपि छद्मवेषधारिणे भिक्षुकाय कवचकुण्डले ददाति। कर्णस्य अदेयं किमपि नास्तीति कर्णस्य स्वकीयैः वचनैः अस्मिन् पाठे प्रकटितम् अस्ति। कविः कर्णस्य मनोभावं सुललितया शैल्या प्रकटयति।

## उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- इन्द्रस्य छलं ज्ञास्यति।
- कर्णस्य दाने औदार्यं ज्ञास्यति।
- कवेः भासस्य कवित्वं परिचिनुयात्।
- नाटके एकैकं प्रसङ्गं संस्कृतपरम्परायां कथम् उपन्यस्यते इति बोद्धुं शक्नुयात्।
- विभिन्नशब्दानां प्रयोगं कर्तुं शक्नुयात्।
- व्याकरणविषयान् कांश्चन अवगन्तुं पारयेत्।
- अत्रत्यशब्दान् ज्ञात्वा संस्कृतेन लेखने वचने च तेषां शब्दानां प्रयोगं कर्तुं शक्ष्यति।

## १८.१) मूलपाठम् अवगच्छाम

**(नेपथ्ये)**

**भो कण्ण ! महत्तरं भिक्खं याचेमि। [भोः कर्ण ! महत्तरां भिक्षां याचे।]**

**कर्णः — (आकर्ण्य) अये वीर्यवान् शब्दः।**

**श्रीमानेष न केवलं द्विजवरो यस्मात् प्रभावो महा-**
**नाकर्ण्य स्वरमस्य धीरनिनदं चित्रार्पिताङ्गा इव।**
**उत्कर्णस्तिमिताञ्चिताक्षवलितग्रीवार्पिताग्राननाः-**
**स्तिष्ठन्त्यस्ववशाङ्गयष्टि सहसा यान्तो ममैते हयाः॥१५॥**

**आहूयतां स विप्रः। न न। अहमेवाह्वयामि। भगवन्नित इतः।**

## व्याख्या

**श्लोकान्वयः** - एष केवलं द्विजवरः न अपि तु श्रीमान्, यस्मात् महान् प्रभावः, धीरनिनदं स्वरमाकर्ण्य मम एते हयाः उत्कर्णस्तिमिताञ्चिताक्षवलितग्रीवार्पिताग्राननाः अस्ववशाङ्गयष्टि सहसा यान्तः चित्रार्पिता इव तिष्ठन्ति॥१५॥

**व्याख्या** - आकर्ण्य श्रुत्वा। वीर्यवान् गम्भीरः। श्रीमान् इति- एषः याचकः, केवलम् एकमात्रं द्विजवरः ब्राह्मणश्रेष्ठः न, अपि तु श्रीमान् श्रिया विशिष्टः, विशिष्टशोभायुक्तः। यस्मात् यतः कारणात् महान् अतिशयितः प्रभावः दृश्यते इति शेषः। कः सः प्रभावः? (तस्य) धीरनिनदं धीरः गम्भीरः निनदः घोषः यस्मिन् सः, तम् स्वरं कण्ठरवम् आकर्ण्य श्रुत्वा मम कर्णस्य एते हयाः घोटकाः उत्कर्णस्तिमिताञ्चिताक्षवलितग्रीवार्पिताग्राननाः - उत्कर्णाः श्रवणोत्सुकाः स्तिमिताञ्चिताक्षाः स्तिमितानि निमीलितानि अञ्चितानि मनोहराणि अक्षीणि नयनानि येषां ते उत्कर्णस्तिमिताञ्चिताक्षाः, वलितग्रीवार्पिताननाः वलितायां ग्रीवायाम् अर्पितानि अग्राननानि येषां ते, उत्कर्णाः च स्तिमिताञ्चिताक्षाः च वलितग्रीवार्पिताग्राननाः च इति उत्कर्णस्तिमिताञ्चिताक्षवलितग्रीवार्पिताग्राननाः। अस्ववशाङ्गयष्टि स्ववशा न भवतीति अस्ववशा अङ्गयष्टिः शरीरं यस्मिन् कर्मणि तद्यथा स्यात् पराधीनशरीरम्, सहसा अकस्मात्, यान्तः गच्छन्तः, चित्रार्पिताङ्गाः चित्रे चित्रफलके, अर्पितानि प्रदत्तानि अङ्गानि शरीराणि येषां ते, चित्रलिखिताः, इव यथा तिष्ठन्ति स्थिराः भवन्ति। याचकस्य अस्य प्रभावाद् एव मम अश्वाः चित्रलिखिता इव निश्चलाः सम्पन्नाः इत्यर्थः। शार्दूलविक्रीडितं छन्दः।॥१५॥

**सरलार्थः** - एवम् उक्त्वा युद्धस्थलगमनाय कर्णः शल्येन सह रथारोहणं कृतवान्। ततः कर्णः शल्यम् आदिष्टवान् यत् यत्र अर्जुनः अस्ति तत्रैव मम रथः नीयतामिति। तस्मिन्नेव समये कर्णः मार्गे 'महत्तरां भिक्षां याचे' इति भिक्षुणा कथितम् गम्भीरम् शब्दम् श्रुत्वा आह - एषः कण्ठस्वरः श्रीमतः वीर्यवतः च ब्राह्मणस्य, यतो हि धीरनिनादं कण्ठस्वरमिमम् आकर्ण्य अश्वाः उत्सुकाः सन्तः सुन्दराणि नयनानि सोत्सुकम् उन्मील्य चित्रार्पिताः इव स्थिराः संवृत्ताः इति। तेषाम् अङ्गानि स्ववशे न सन्ति। एवम् उक्त्वा स शल्याय उक्तवान् यथा शल्यः विप्रम् आह्वयेत्, परन्तु तत् स्वयमेव निषिद्ध्य स स्वयं विप्रम् आहूतवान्।

**व्याकरणविमर्शः -**

- आकर्ण्य - आ √ कर्ण + क्त्वा (ल्यप्)-प्रत्यये। (कर्ण भेदने, आकर्णयति शृणोति)
- यान्तः - √या + शतृप्रत्यये पुंलिङ्गे प्रथमाविभक्तौ बहुवचने। (या प्रापणे)

- वाच्यान्तरम् - आहूयतां स विप्रः (कर्मणि) - (भवान्) तं विप्रम् आह्वयतु। (कर्तरि)

## १८.२) मूलपाठम् अवगच्छाम

**(ततः प्रविशति ब्राह्मणरूपेण शक्रः)**

**शक्रः — भो मेघाः, सूर्येणैव निवर्त्य गच्छन्तु भवन्तः। (कर्णमुपगम्य)**

**भो कण्ण! महत्तरं भिक्खं याचेमि। [भोः कर्ण! महत्तरां भिक्षां याचे।]**

**कर्णः — दृढं प्रीतोऽस्मि भगवन्!**

**यातः कृतार्थगणनामहमद्य लोके**
**राजेन्द्रमौलिमणिरञ्जितपादपद्मः।**
**विप्रेन्द्रपादरजसा तु पवित्रमौलिः**
**कर्णो भवन्तमहमेष नमस्करोमि॥१६॥**

## व्याख्या

**श्लोकान्वयः** - अद्य लोके राजेन्द्रमौलिमणिरञ्जितपादपद्मः कृतार्थगणनां यातः तु विप्रेन्द्रपादरजसा पवित्रमौलिः एषः अहम् कर्णः भवन्तं नमस्करोमि॥१६॥

**व्याख्या** - यात इति - अद्य सम्प्रति, लोके भुवने, राजेन्द्रमौलिमणिरञ्जितपादपद्मः राजेन्द्राणां राजश्रेष्ठानाम्, मौलौ शिरसि, ये मणयः रत्नानि, तैः रञ्जितं सुशोभितं, पादपद्मं चरणकमलं यस्य सः। कृतार्थगणनां कृतार्थानां कृतज्ञानाम्, गणनां संख्यानम्, अहम् कर्णः, यातः प्राप्तः। तु किन्तु, विप्रेन्द्रपादरजसा विप्रेन्द्राणां द्विजश्रेष्ठानाम्, पादरजसा चरणरेणुना, पवित्रमौलिः पवित्रमस्तकः, एषः भवत्पुरः स्थितः, अहं कर्णः, भवन्तं याचकम्, नमस्करोमि प्रणमामि। वसन्ततिलकावृत्तम् ॥१६॥

**सरलार्थः** - कर्णस्य आह्वानेन ब्राह्मणरूपधारी मञ्चं प्रविश्य मेघान् उद्दिश्य उक्तवान् यत् भो मेघाः, भवन्तः सूर्येण सह एव प्रयाणं कुर्वन्तु इति। ततः स कर्णस्य समीपम् आगत्य उक्तवान्- भो कर्ण, महत्तरां भिक्षां याचे इति। ब्राह्मणं दृष्ट्वा प्रीतः सन् कर्णः तस्याशीर्वादलाभाय तं नमस्करोति, वदति च – राजश्रेष्ठानां मुकुटमणिभिः मम चरणकमले शोभिते, लोके कृतार्थेषु अहम् अन्यतमः, ब्राह्मणश्रेष्ठानां पादरजसा पवित्रीकृतमस्तकः अहं कर्णः अद्य भवन्तं नमस्करोमि इति।

**व्याकरणविमर्शः -**

- उपगम्य – उप-√गम् + क्त्वा (ल्यप्) -प्रत्यये।
- पद्म – वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्। सहस्रपत्रं कमलं शतपत्रं कुशेशयम्।। इत्यमरः।
- रजः - रेणुर्द्वयोः स्त्रियां धुलिः पांसुर्ना न द्वयो रजः इत्यमरः।

## १८.३) मूलपाठम् अवगच्छाम

**शक्रः — (आत्मगतम्) किं नु खलु मया वक्तव्यं, यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुर्भविष्यति। यदि न वक्ष्ये मूढ इति मां परिभवति। तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि। भवतु दृष्टम्। (प्रकाशम्) भो कण्ण ! सुय्ये विअ, चन्दे विअ, हिमवन्ते विअ, सागले विअ, चिट्ठदु दे जसो। [भो कर्ण! सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः।]**

**कर्णः — भगवन्! किं न वक्तव्यं दीर्घायुर्भवेति। अथवा एतदेव शोभनम्। कुतः —**

**धर्मो हि यत्नैः पुरुषेण साध्यो**
**भुजङ्गजिह्वाचपला नृपश्रियः।**
**तस्मात् प्रजापालनमात्रबुद्ध्या**
**हतेषु देहेषु गुणा धरन्ते॥१७॥**

**भगवन् किमिच्छसि। किमहं ददामि।**

## व्याख्या

**श्लोकान्वयः** - हि पुरुषेण धर्मः यत्नैः साध्यः, नृपश्रियः भुजङ्गजिह्वाचपलाः, तस्मात् देहेषु नष्टेषु प्रजापालनमात्रबुद्ध्या गुणाः धरन्ते॥१७॥

**व्याख्या** - परिभवति- उपहसति।

धर्मः इति - हि यतः, पुरुषेण मानवेन, धर्मः शास्त्रोक्तविधिनिषेधादिः, यत्नैः श्रद्धया साध्यः कर्तव्यः, नृपश्रियः राजलक्ष्म्यः, भुजङ्गजिह्वाचपलाः भुजङ्गानाम् सर्पाणाम्, जिह्वा रसना, इव चपलाः चञ्चलाः, तस्मात् तद्धेतोः, देहेषु शरीरेषु, हतेषु विनष्टेषु, प्रजापालनमात्रबुद्ध्या प्रजानां पालनं संरक्षणम्, तन्मात्रा बुद्धिः मतिः, तया। गुणाः दयादाक्षिण्यादयः धरन्ते तिष्ठन्ति। उपजातिवृत्तम्॥१७॥

**सरलार्थः** - कर्णवचनं श्रुत्वा शक्रः आत्मगततया वक्ति यत् यदि आशीर्वादरूपेण दीर्घायुः भव इति वदिष्यामि, तर्हि सः दीर्घायुः भविष्यति, परन्तु न वदिष्यामि चेत् मूढ इति विचिन्त्य मम उपहसनं करिष्यति। तस्मात् उभयमपि परित्यक्तव्यम्। ततः स प्रकाश्येन वदति - भोः कर्ण, सूर्यः इव, चन्द्रः इव, पर्वतमिव, सागरः इव भवतः यशः चिरं तिष्ठतु इति। सामान्यतः आशीर्वादरूपेण सर्वे दीर्घायुः प्रार्थयन्ते, परन्तु एष ब्राह्मणः तथा न उक्तवान्। तस्मात् एतद् आकर्ण्य कर्णः वक्ति - हे ब्राह्मण, दीर्घायुः भव इति किं न वक्तव्यम्? अथवा दीर्घायुषापेक्षया अयम् आशीर्वादः एव शोभनः। किमर्थमिति चेत् - धर्मः परमयत्नेन पुरुषेण कर्तव्यः, राजलक्ष्मीः सर्पजिह्वा इव अत्यन्तं चञ्चला, तस्मात् प्रजापालनमात्रबुद्ध्या कर्तव्यं कर्म सम्पादनीयम्। देहत्यागात् अनन्तरं गुणाः एव तिष्ठन्ति, अर्थात् गुणैः हि मानवः दीर्घजीवी भवति, न तु अर्थेन, न वा देहमाश्रित्य दीर्घकालजीवितेन इत्यर्थः। ततः स ब्राह्मणः कर्णात् किम् इच्छति इति पृष्टवान् कर्णः।

**व्याकरणविमर्शः -**

- यशः - यशः कीर्तिः समज्ञा च इत्यमरः।
- भुजङ्गः - सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः।। आशीविषो विषधरश्चक्री व्यालः सरीसृपः। कुण्डली गूढपाच्चक्षुःश्रवा काकोदरः फणी।। दर्विकरो दीर्घपृष्ठो दन्दशूको बिलेशयः। उरगः पन्नगो भोगी जिह्मगः पवनाशनः।। इत्यमरः।
- वाच्यान्तरम् - धर्मः हि यत्नैः पुरुषेण साध्यः (कर्मणि) - पुरुषः हि यत्नैः धर्मं साधयेत्। (कर्तरि)

## पाठगतप्रश्नाः-१

१. ब्राह्मणरूपी शक्रः कर्णाय कम् आशीर्वादं दत्तवान्?
२. इन्द्रः किं रूपम् आश्रित्य कर्णसमीपम् आगतवान्?
३. कर्णः शक्रात् कम् आशीर्वादं वस्तुतः इच्छति।
४. हुतं च दत्तं च तथैव तिष्ठति- कस्य उक्तिः इयम्?
५. भुजङ्गजिह्वाचपलाः नृपश्रियः - इति वाक्यस्य कः अर्थः?

## १८.४) मूलपाठम् अवगच्छाम

**शक्रः — महत्तरं भिक्खं याचेमि। [महत्तरां भिक्षां याचे।]**

**कर्णः — महत्तरां भिक्षां भवते प्रदास्ये। श्रूयन्तां मद्विभवाः।**

**गुणवदमृतकल्पक्षीरधाराभिवर्षि**
**द्विजवर रुचितं ते तृप्तवत्सानुयात्रम्।**
**तरुणमधिकमर्थिप्रार्थनीयं पवित्रं**
**विहितकनकशृङ्गं गोसहस्रं ददामि॥१८॥**

## व्याख्या

**श्लोकान्वयः** - हे द्विजवर, (अहम्) गुणवदमृतकल्पक्षीरधाराभिवर्षि, तृप्तवत्सानुपात्रं तरुणम् अधिकम् अर्थिप्रार्थनीयं विहितकनकशृङ्गं पवित्रं रुचितं गोसहस्रं ते ददामि॥१८॥

**व्याख्या** - गुणवदिति - हे द्विजवर हे ब्राह्मणश्रेष्ठ, (अहं कर्णः) गुणवदमृतकल्पक्षीरधाराभिवर्षि - गुणवतां प्रशस्तगुणयुक्तानाम्, अमृतकल्पानां सुधातुल्यानाम्, क्षीराणां दुग्धानाम्, धारां प्रवाहम्, अभिवर्षितुमं शीलम् अस्य इति गुणवदमृतकल्पक्षीरधाराभिवर्षि। तृप्तवत्सानुपात्रं तृप्तानाम् सन्तुष्टानाम्, वत्सानाम् गोशिशूनाम्, अनु पश्चात् यात्रा लोकनिर्वाहः यस्य तत्, वत्सतृप्त्यनन्तरम् अपि

लोकयात्रानिर्वाहिकीम्, तरुणं युवानम्, अधिकं भूयिष्ठम्, अर्थिप्रार्थनीयम् - अर्थिभिः याचकैः, प्रार्थनीयं याचनीयम्, विहितकनकशृङ्गम् - विहितानि अलङ्कृतानि कनकैः सुवर्णैः शृङ्गाणि यस्मिन् तत्। पवित्रं यज्ञार्हम्, रुचितं शोभनम्, गोसहस्रम् - गवां.धेनूनाम्, सहस्रं दशशतसंख्याकम्, ते तुभ्यं ददामि समर्पयामि। मालिनीवृत्तम्॥१८॥

**सरलार्थः** - महत्तरां भिक्षां याचे इति ब्राह्मणवचनं श्रुत्वा तस्य याच्ञायां सङ्कोचदूरीकरणार्थम् स्वस्य विभवं प्रकटयति कर्णः। कर्णः कथयति - गवां सहस्रं भवते दास्यामि इति। कीदृश्यः गावः इति चेत् ताः गुणयुक्ताम् अमृततुल्यां दुग्धधारां वर्षयन्ति, तासां दुग्धेन वत्साः तृप्ताः भवन्ति, किञ्च लोकयात्रानिर्वाहः अपि सम्भवति। ताः तरुणाः, सर्वैः अर्थिभिः च इष्यमाणाः, तासां शृङ्गाणि सुवर्णैः अलङ्कृतानि च।

**व्याकरणविमर्शः -**

- प्रदास्ये - प्र-√दा+ लृटि प्रथमपुरुषैकवचने।
- पवित्रम् - पूतं पवित्रं मेध्यं च वीध्रं तुं विमलार्थकम् इत्यमरः।
- वाच्यान्तरम् - महत्तरां भिक्षां याचे (कर्तरि) - (मया) महत्तरा भिक्षा याच्यते (कर्मणि)।

## १८.५) मूलपाठम् अवगच्छाम

**शक्रः — गोसहस्सं त्ति। मुहुत्तअं खिरं पिबामि। णेच्छामि कण्ण! णेच्छामि। [गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण! नेच्छामि।]**

**कर्णः — किं नेच्छसि भवान्। इदमपि श्रूयताम्।**

**रवितुरगसमानं साधनं राजलक्ष्म्या**
**सकलनृपतिमान्यं मान्यकाम्बोजजातम्।**
**सुगुणमनिलवेगं युद्धदृष्टापदानं**
**सपदि बहुसहस्रं वाजिनां ते ददामि॥१९॥**

## व्याख्या

**श्लोकान्वयः** - रवितुरगसमानं राजलक्ष्म्याः साधनं सकलनृपतिमान्यं मान्यकाम्बोजजातम् सुगुणम् अनिलवेगं युद्धदृष्टापदानं वाजिनां बहु सहस्रं सपदि ते ददामि॥१९॥

**व्याख्या** - रवीति - रवितुरगसमानं रवेः तुरगाः तैः समानम्, सूर्याश्वतुल्यम्। राजलक्ष्म्याः राज्ञाम् लक्ष्मीः तस्याः नृपश्रियः, साधनं कारणम्, सकलनृपतिमान्यं सकलानां सम्पूर्णानां नृपतीनां राज्ञां मान्यं मानार्हम्, मान्यकाम्बोजजातं मान्येषु प्रशस्ततरेषु काम्बोजेषु एतन्नामकदेशविशेषेषु जातं समुत्पन्नम्। सुगुणं प्रशस्तगुणयुक्तम्, अनिलवेगं वायुजवम्, युद्धदृष्टापदानं युद्धेषु दृष्टानि अपदानानि पराक्रमयुक्तकर्माणि

यस्मिन् तत् समरदृष्टपराक्रमादिकर्मवृत्तम्, वाजिनां तुरगाणाम्, बहुसहस्रम् अनेकसहस्रसंख्याकं सपदि सद्यः ते तुभ्यं ददामि अर्पणं करोमि। मालिनीवृत्तम्॥१९॥

**सरलार्थः** - कर्णेन दातुम् इष्यमाणं गोसहस्रं न इच्छति याचकः। सः कथयति - यद् गोसहस्रं भवान् दातुम् इच्छति तेन स्वल्पकालं यावत् क्षीरं पिबामि केवलम्। अतः तद् न इच्छामि इति। तदा कर्णः बहुसहस्राणि अश्वान् दातुम् इच्छन् कथयति - सूर्याश्वतुल्यान्, राजलक्ष्म्याः साधनभूतान्, सकलनृपैः अभिवन्द्यान्, काम्बोजकुले जातान्, प्रशस्तगुणयुक्तान् वायुसमानवेगान् युद्धे दृष्टपराक्रमान् बहुसहस्राणि अश्वान् इदानीम् एव ददामि इति।

**व्याकरणविमर्शः -**

- क्षीरम् - दुग्धं क्षीरं पयः समम् इत्यमरः।
- अनिलः - श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः। पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः।। इत्यमरः।

## १८.६) मूलपाठम् अवगच्छाम

**शक्रः — अस्स त्ति। मुहूत्तअं आलुहामि। णेच्छामि कण्ण! णेच्छामि। [अश्व इति। मुहूर्तकम् आलुभामि। नेच्छामि कर्ण, नेच्छामि।]**

**कर्णः — किं नेच्छति भगवान्। अन्यदपि श्रूयताम्!**

**मदसरितकपोलं षट्पदैः सेव्यमानं**
**गिरिवरनिचयाभं मेघगम्भीरघोषम्।**
**सितनखदशनानां वारणानामनेकं**
**रिपुसमरविमर्दं वृन्दमेतद्ददामि॥२०॥**

## व्याख्या

**श्लोकान्वयः** - मदसरितकपोलं षट्पदैः सेव्यमानं गिरिवरनिचयाभं मेघगम्भीरघोषं सितनखदशनानां वारणानां रिपुसमरविमर्दम् एतद् अनेकं वृन्दं ते ददामि॥२०॥

**व्याख्या** - मदेति- मदसरितकपोलं मदेन सरिताः सिक्ताः, कपोलाः गण्डस्थलाः, यस्मिन् तत्, षट्पदैः भ्रमरैः, सेव्यमानं निरन्तरं विराजितम्, गिरिवरनिचयाभं गिरिवराणां पर्वतश्रेष्ठानाम् निचयाः पुञ्जाः तेषाम् आभा इव आभा यस्मिन् तत्। मेघगम्भीरघोषं मेघः, जलदः इव गम्भीरः घोषाः स्वरः यस्मिन् तत्। सितनखदशनानां सिताः शुभ्रवर्णाः नखाः दशनाश्च येषां तेषां शुभ्रनखदन्तानाम्। वारणानां गजानाम्, रिपुसमरविमर्दं शत्रूणां समरे संग्रामे विमर्दं मर्दनकारकम् एतत् इदम्, अनेकम् बहु, वृन्दं समूहम्, ते ददामि, दानं करोमि। मालिनीवृत्तम्॥२०॥

**सरलार्थः** - अश्वसहस्रम् अपि न स्वीकरोति याचकः। सः कथयति - स्वल्पकालं यावत् एव अश्वे आरोहणं करिष्यामि। तस्मात् तत् न इच्छामि इति। तदा कर्णः गजसमूहं दातुम् इच्छन् कथयति -

येषां गण्डस्थलानि मदेन सिक्तानि, मदगन्धेन च भ्रमराः समन्तात् राजन्ते, पर्वतमिव येषां गात्रवर्णः, येषां गर्जनं गम्भीरमेघवत्, येषां नखाः दन्ताः च श्वेतवर्णाः, ये च संग्रामे शत्रून् नाशयन्ति, तादृशान् बहून् गजान् ददामि इति।

**व्याकरणविमर्शः -**

- सेव्यमानः - √सेव् + लट् + कर्मणि शानच् + पुंलिङ्गे प्रथमाविभक्त्येकवचने। (षेवृ सेवने)
- षट्पदः - द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः।। इत्यमरः।
- मेघः - अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः। धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत्।। इत्यमरः।

## १८.७) मूलपाठम् अवगच्छाम

**शक्रः — गअ त्ति। मुहुत्तअं आलुहामि णेच्छामि कण्ण! णेच्छामि। [गज इति। मुहूर्तकम् आलुभामि नेच्छामि कर्ण नेच्छामि]**

**कर्णः — किं नेच्छति भवान्। अन्यदपि श्रूयताम्। अपर्याप्तं कनकं ददामि।**

**शक्रः — गह्निअ गच्छामि। (किञ्चिद् गत्वा) णेच्छामि कण्ण! णेच्छामि। [गृहीत्वा गच्छामि। नेच्छामि कर्ण ! नेच्छामि।]**

**कर्णः — तेन हि जित्वा पृथिवीं ददामि।**

**शक्रः — पुहुवीए किं करिस्सम्। [पृथिव्या किं करिष्यामि।]**

**कर्णः — तेन ह्यग्निष्टोमफलं ददामि।**

**शक्रः — अग्गिट्ठोमफलेन किं कय्यं। [अग्निष्टोमफलेन किं कार्यम्।]**

**कर्णः — तेण हि मच्छिरो ददामि। [तेन हि मच्छिरो ददामि।]**

**शक्रः — अविहा अविहा। [अविहा अविहा!]**

**कर्णः — न भेतव्यं न भेतव्यम्। प्रसीदतु भवान्। अन्यदपि श्रूयताम्।**

**अङ्गैः सहैव जनितं मम देहरक्षा**
**देवासुरैरपि न भेद्यमिदं सहस्रैः।**
**देयं तथापि कवचं सहकुण्डलाभ्यां**
**प्रीत्या मया भगवते रुचितं यदि स्यात् ॥२१॥**

## व्याख्या

**श्लोकान्वयः** - अङ्गैः सह एव जनितं मम देहरक्षा सहस्त्रैः देवासुरैः अपि यन्न भेद्यं तथापि कुण्डलाभ्यां सह इदं कवचं यदि भगवते रुचितं स्यात् तर्हि मया प्रीत्या देयम्॥२१॥

**व्याख्या** - अङ्गैः इति- अङ्गैः शरीरावयवैः, सह सार्धम् एव, जनितम् उत्पन्नम्, मम कर्णस्य, देहरक्षा शरीररक्षणम्, सहास्त्रैः आयुधधारिभिः, देवासुरैः देवदानवैः, अपि यन्न भेद्यं भेत्तुं योग्यम्। तथापि कुण्डलाभ्यां कर्णाभरणाभ्याम्, सह साकम्, कवचं वर्म, यदि चेत्, भगवते ब्राह्मणाय रुचितम् अभिलषितम्, स्यात् भवेत्, तदा मया कर्णेन, प्रीत्या सहर्षचित्तेन, देयं दातुं योग्यम्। यद्यपि अनेन कवचेन ममाङ्गरक्षणम् भवति, तथापि यदि इदं भवताम् अभीष्टं स्यात् तर्हि तदपि ददामि इति भावः। वसन्ततिलकावृत्तम्॥२१॥

**सरलार्थः** - कर्णः गजान् दातुम् इच्छति इति श्रुत्वा याचकः कथयति - गजे स्वल्पकालं यावत् आरोहणं करिष्यामि। अतः तत् न इच्छामि। कर्णः तदा कथयति - यथेच्छं सुवर्णं ददामि इति। एतत् श्रुत्वा सुवर्णं गृहीत्वा गमिष्यामि इति वदन् अपि किञ्चित् गत्वा याचकः पुनः कथयति - सुवर्णं न इच्छामि इति। तदा कर्णः उक्तवान् - जित्वा भूमिं ददामि इति। याचकः कथयति - पृथिव्या किं करिष्यामि। नास्ति प्रयोजनं पृथिव्या इत्यर्थः। तदा कर्णः वदति - अग्निष्टोमनामकः यागः स्वर्गफलप्रदः वेदविद्भिः अवश्यम् आचरणीयः, तस्य फलं दातुम् इच्छामि इति। शक्रः कथयति - अग्निष्टोमेन नास्ति मे प्रयोजनम् इति। तदा कर्णः कथयति- तर्हि मम मस्तकं ददामि। अर्थात् मम प्राणाः गृह्यन्ताम् इति। तदा शक्रः - अनर्थः अनर्थः इति कथयति। तत् श्रुत्वा न भेतव्यं न भेतव्यम् इति सान्त्वयति कर्णः। तत् तत् देयं पुनः पुनः वारयन्तं ब्राह्मणं दृष्ट्वा तदभिलषिते कवचकुण्डले दातुं स्वयं कर्णः प्रतिजानीते - मम देहरक्षायै कुण्डलाभ्यां सह कवचं मम जन्मनः एव विद्यते, एतत् च कवचं सहस्रैः देवैः असुरैः च न भेत्तुं योग्यम्। यदि भवान् इच्छति तर्हि कवचकुण्डले अपि दास्यामि।

**व्याकरणविमर्शः** -

- श्रूयताम् - √श्रु+ कर्मणि (य) + लोटि प्रथमपुरुषैकवचने। (श्रु श्रवणे)
- भेतव्यम् - √भी+ तव्यप्रत्यये। (ञिभी भये)
- कनकम् - स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् इत्यमरः।

### पाठगतप्रश्नाः-२

६. कति गाः दातुम् उद्युक्तः कर्णः।

७. कतीनाम् वाजिनां दानं प्रस्तौति कर्णः।

८. केषां वृन्दं दातुम् इच्छति कर्णः।

९. कियत् कनकं दातुम् इच्छति कर्णः।

१०. कीदृशीं पृथिवीं दातुम् इच्छति कर्णः।

## १८.८) मूलपाठम् अवगच्छाम

**शक्रः — (सहर्षम्) देदु, देदु। [ददातु, ददातु।]**

**कर्णः — (आत्मगतम्) एष एवास्य कामः। किं नु खल्वनेककपटबुद्धेः कृष्णस्योपायः। सोऽपि भवतु। धिगयुक्तमनुशोचितम्। नास्ति संशयः (प्रकाशम्) गृह्यताम्।**

**शल्यः — अङ्गराज! न दातव्यं न दातव्यम्।**

**कर्णः — शल्यराज! अलमलं वारयितुम्। पश्य**

**शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति**
**हुतं च दत्तं च तथैव तिष्ठति॥२२॥**

**तस्माद् गृह्यताम् (निकृत्य ददाति।)**

## व्याख्या

**श्लोकान्वयः** - कालपर्ययात् शिक्षा क्षयं गच्छति सुबद्धमूलाः पादपाः निपतन्ति। जलस्थानगतं जलं शुष्यति च। किन्तु हुतं च दत्तं च तथैव तिष्ठति॥२२॥

**व्याख्या** - अनेककपटबुद्धेः, अनेका बह्वी, कपटा चतुरा, बुद्धिः मतिः यस्य, तस्य अनेककपटबुद्धेः कृष्णस्य। अलं वारयितुम् - वारणेन नास्ति प्रयोजनम्, न वारयतु इत्यर्थः।

शिक्षा इति - कालपर्ययात् कालस्य समयस्य पर्ययः विपरिवर्तनं तस्मात्। शिक्षा अध्ययनं क्षयं नाशं गच्छति प्राप्नोति। सुबद्धमूलाः सुबद्धानि दृढतरं निगडितानि मूलानि येषां ते तथाभूताः, पादपाः वृक्षाः, निपतन्ति भूमौ पतिताः भवन्ति। जलस्थानगतं जलस्य स्थानं जलाशयं तत्र गतं प्राप्तं जलाशयस्थं जलं नीरं शुष्यति शुष्कतां प्राप्नोति च। किन्तु यत् हुतम् वैधे आधारभूते अग्नौ समन्त्रं प्रक्षिप्तम्, दत्तम् उचिते देशकाले सत्पात्रे प्रत्यर्पितम्, तत् तथैव अविनश्वररूपेण तिष्ठति वर्तमानः भवति। अतः सर्वेभ्यः वस्तुभ्यः हुतं दत्तं च प्रशस्यतरम् इति भावः। वंशस्थवृत्तम्॥२२॥

**सरलार्थः** - कवचकुण्डलनामश्रवणात् एव शक्रः सहर्षं वदति - ददातु ददातु इति। तदा कर्णः आत्मगततया वक्ति यत् - एष कवचकुण्डले एव स्वीकर्तुम् इच्छति। कपटबुद्धेः कृष्णस्य कार्यम् एतत्। यत् दास्यामि इति मया उक्तं तद्विषये शोकः न कर्तव्यः इति। एवं मनसि विचिन्त्य - गृह्यताम् इति वदति कर्णः। शल्यराजः तं वारयति। परन्तु तद् अगणनयन् कर्णः वदति - कालेन शिक्षा क्षयं गच्छति, दृढमूलाः बृक्षाः अपि कालेन पतन्ति, जलाशयगतं जलं च कालेन शुष्यति, परन्तु दानं, यज्ञे च आहुतं सर्वं यथावत् अविनश्वररूपेण तिष्ठति इति। ततः कर्णः कवचकुण्डले उत्पाट्य शक्राय ददाति।

**व्याकरणविमर्शः -**

- निकृत्य - नि-√कृत् +क्त्वा (ल्यप्) प्रत्यये, उत्पाट्य इत्यर्थः। (कृती छेदने)
- दातव्यम् - √दा + तव्यप्रत्यये। (डुदाञ् दाने)
- निपतन्ति - नि-√पत् + लटि प्रथमपुरुषबहुवचने। (पत्लृ गतौ)
- पादपः - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः इत्यमरः।

## १८.९) मूलपाठम् अवगच्छाम

**शक्रः — (गृहीत्वा आत्मगतम्) हन्त गृहीते एते। पूर्वमेवाहमर्जुनविजयार्थं सर्वदेवैर्यत् समर्थितं तदिदानीं मयानुष्ठितम्। तस्मादहमप्यैरावतमारुह्यार्जुनकर्णयोर्द्वन्द्वयुद्धं पश्यामि।**

**(निष्क्रान्तः।)**

**शल्यः — भो अङ्गराज ! वञ्चितः खलु भवान्।**

**कर्णः — केन?**

**शल्यः — शक्रेण।**

**कर्णः — न खलु। शक्रः खलु मया वञ्चितः। कुतः,**

**अनेकयज्ञाहुतितर्पितो द्विजैः**
**किरीटवान् दानवसङ्घमर्दनः।**
**सुरद्विपस्फालनकर्कशाङ्गुलि-**
**र्मया कृतार्थः खलु पाकशासनः॥२३॥**

# व्याख्या

**श्लोकान्वयः** - द्विजैः अनेकयज्ञाहुतितर्पितः किरीटवान् दानवसंघमर्दनः सुरद्विपास्फालनकर्कशाङ्गुलिः पाकशासनः मया कृतार्थः खलु॥२३॥

**व्याख्या** - अनेकेति- द्विजैः ब्राह्मणैः, अनेकयज्ञाहुतितर्पितः अनेकेषु बहुषु यज्ञेषु मखेषु या आहुतयः ताभिः तर्पितः प्रीणितः, किरीटवान् किरीटः अस्ति अस्येति किरीटवान् मुकुटधारी। दानवसङ्घमर्दनः दानवसङ्घान् दैत्यसमूहान् मर्दयति नाशयति तथाभूतः, सुरद्विपस्य ऐरावतस्य आस्फालनं तैः कर्कशाः अङ्गुलयः यस्य सः ऐरावतसञ्चालनसञ्जातकठिनाङ्गुलीकः। पाकशासनः इन्द्रः, मया कर्णेन, कृतार्थः सफलमनोरथः, कृतः सम्पादितः। ब्राह्मणाः अनेकयज्ञहविषा यं प्रीणयन्ति स शक्रः मत्सकाशात् याचमानः मया पूरितमनोरथः अभूद् इति भावः। वंशस्थवृत्तम्॥२३॥

**सरलार्थः** - कवचकुण्डले गृहीत्वा शक्रः आत्मगततया वक्ति यत् पूर्वमेव अर्जुनस्य जयलाभाय सर्वे देवाः यत् समर्थितवन्तः इदानीं मया तत् कर्म सम्पादितम्। अतः अहम् अर्जुन-कर्णयोः युद्धम्

ऐरावतात् पश्यामि। एवम् उक्त्वा शक्रः निष्क्रान्तः। शल्यः तदा कर्णं वदति यत् इन्द्रः भवन्तं वञ्चितवान् इति। कर्णः तदा कथयति - अहम् इन्द्रेण न वञ्चितः, अपि तु इन्द्रः मया वञ्चितः इति। किमर्थम् इति चेत् - यः यज्ञे आहुतिप्रदानेन बहुभिः ब्राह्मणैः तृप्यते, किरीटधारी यः दानवान् निहन्ति, ऐरावतसञ्चलनेन यस्य अङ्गुलयः कर्कशाः संवृत्ताः, स खलु इन्द्रः अद्य कर्णेन उपकृतः। तस्मात् इन्द्रः एव कर्णेन वञ्चितः इति।

**व्याकरणविमर्शः -**

- गृहीत्वा - √ग्रह + क्त्वाप्रत्यये। (ग्रह उपादाने)
- यज्ञः - यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः इत्यमरः।

## १८.१०) मूलपाठम् अवगच्छाम

**(प्रविश्य ब्राह्मणरूपेण)**

**देवदूतः — भोः कर्ण! कवचकुण्डलग्रहणाज्जनितपश्चात्तापेन पुरन्दरेणानुगृहीतोऽसि। पाण्डवेष्वेकपुरुषवधार्थममोघमस्त्रं विमला नाम शक्तिरियं प्रतिगृह्यताम्।**

**कर्णः — धिग्, दत्तस्य न प्रतिगृह्णामि।**

**देवदूतः — ननु ब्राह्मणवचनाद् गृह्यताम्।**

**कर्णः — ब्राह्मणवचनमिति। न मयातिक्रान्तपूर्वम्। कदा लभेय।**

**देवदूतः — यदा स्मरसि तदा लभस्व।**

**कर्णः — बाढम्। अनुगृहीतोऽस्मि। प्रतिनिवर्ततां भवान्।**

**देवदूतः — बाढम्। (निष्कान्तः)**

**कर्णः — शल्यराज! यावद्रथमारोहावः।**

**शल्यः — बाढम्। (रथारोहणं नाटयतः।)**

**कर्णः — अये! शब्द इव श्रूयते। किं नु खल्विदम्**

**शङ्खध्वनिः प्रलयसागरघोषतुल्यः**
**कृष्णस्य वा न तु भवेत् स तु फाल्गुनस्य।**
**नूनं युधिष्ठिरपराजयकोपितात्मा**
**पार्थः करिष्यति यथाबलमद्य युद्धम्॥२४॥**

**शल्यराज ! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः।**

**शल्यः — बाढम्!**

## व्याख्याः

**श्लोकान्वयः** - प्रलयसागरघोषतुल्यः शङ्खध्वनिः कृष्णस्य वा न तु भवेत् स तु फाल्गुनस्य भवेत्। युधिष्ठिरपराजयकोपितात्मा पार्थः अद्य यथाबलं युद्धं करिष्यति इति नूनम्॥२४॥

**व्याख्या** - कवचकुण्डलग्रहणात् कवचं च कुण्डले च कवचकुण्डलानि, तेषाम् ग्रहणात्, जनितपश्चात्तापेन जनितः पश्चात्तापः यस्य, तेन समुत्पन्नखेदेन, शक्रः सन् अपि अहं कर्णसकाशात् प्रतिग्रहणम् अकार्षम् इति पश्चात्तापं कुर्वता, पुरन्दरेण इन्द्रेण। अमोघम् अव्यर्थम्।

शङ्खध्वनिः इति- प्रलयसागरघोषतुल्यः प्रलयसागरः प्रलयकालिकः समुद्रः, तस्य घोषः, तेन तुल्यः सदृशः। शङ्खध्वनिः शङ्खस्य ध्वनिः कम्बुरवः, कृष्णस्य वासुदेवस्य, वा अथवा न तु भवेत् न स्यात्। स तु ध्वनिः फाल्गुनस्य अर्जुनस्य, एव भवितुम् अर्हति। यतः युधिष्ठिरपराजयकोपितात्मा, युधिष्ठिरस्य धर्मराजस्य, पराजयः परिभवः, तेन कोपितः क्रुद्धः, आत्मा मनः, यस्य सः पार्थः पृथापुत्रः अर्जुनः, अद्य सम्प्रति संग्रामे, यथाबलं बलम् अनतिक्रम्य इति यथाबलम् यावच्छक्ति, युद्धं संग्रामं करिष्यति विधास्यति। वसन्ततिलकवृत्तम्॥२४॥

**सरलार्थः** - तस्मिन् समये कश्चित् देवदूतः ब्राह्मणरूपेण प्रविश्य निवेदितवान् यत् - कवचकुण्डलग्रहणात् पश्चात्तापेन शक्रेण कर्णाय पाण्डवेषु एकपुरुषघातिनी विमला नाम शक्तिः प्रदत्ता। परन्तु कर्णः दत्तस्य प्रतिग्रहणं नाङ्गीकरोति। परन्तु ब्राह्मणवचनं तेन न पूर्वं न अतिक्रान्तमिति कारणात् देवदूतेन बोधितः सन् स पुनः शक्तिम् अङ्गीकरोति। पुनश्च तं पृच्छति यत् कदा सा शक्तिः लप्स्यते इति। देवदूतः वदति- यदा स्मरिष्यति तदा लप्स्यते इति। एवं निवेद्य देवदूतः प्रस्थानं करोति। शल्यराजः कर्णेन सह रथम् आरोहतः। तस्मिन्नेव समये शङ्खध्वनिं श्रुत्वा कर्णः वदति- कृष्णस्य अथवा अर्जुनस्य तीव्रः शङ्खध्वनिः श्रूयते। मन्ये युधिष्ठिरस्य पराजयं निशम्य अर्जुनः यथाबलं युद्धं करिष्यति। तस्मात् यत्र अर्जुनस्य रथः विद्यते तत्रैव मम रथं नयतु इति। कर्णस्य आदेशं श्रुत्वा शल्यराजः तथैव आचरति।

**व्याकरणविमर्शः -**

- प्रतिनिवर्तताम् - प्रति-नि- √वृत् + लोटि प्रथमपुरुषैकवचने। (वृतु वर्तने)
- ध्वनिः - शब्दे निनादनिनदध्वनिध्वानरवस्वनाः इत्यमरः।
- सागरः - समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः। उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः।। इत्यमरः।

## १८.११) मूलपाठम् अवगच्छाम

**(भरतवाक्यम्)**

> **सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा।**
> **राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः॥२५॥**

**(निष्क्रान्तौ)**

**इति कर्णभारं समाप्तम्।**

## व्याख्या

**श्लोकान्वयः** - सर्वत्र सम्पदः सन्तु सदा विपदः नश्यन्तु, राजगुणोपेतः एकः राजा नः भूमिं प्रशास्तु॥२५॥

**व्याख्या** - सर्वत्र सर्वस्मिन् जगति, सम्पदः सम्पत्तयः, सन्तु तिष्ठन्तु । सदा सर्वदा विपदः विपत्तयः, नश्यन्तु प्रणाशं गच्छन्तु, राजगुणोपेतः राजलक्षणयुक्तः, एकः केवलः, राजा भूपः, राजसिंहः इत्यर्थः, नः अस्माकं भूमिं वसुन्धरां प्रशास्तु प्रकृष्टरूपेण शासनं करोतु। अनुष्टुप् छन्दः॥२५॥

**सरलार्थः** - इदानीम् भरतवाक्येन नाटकस्य समाप्तिः भवति - जगति सर्वत्र सम्पदः भवन्तु, सदा विपदः नश्यन्तु, राजगुणसम्पन्नः कश्चित् राजा पृथिव्याः शासनं करोतु इति।

**व्याकरणविमर्शः -**

- प्रशास्तु - प्र-√शास् + लोटि प्रथमपुरुषैकवचने। (शासु अनुशिष्टौ)
- सम्पद् - अथ सम्पदि। सम्पत्तिः श्रीश्च लक्ष्मीश्च इत्यमरः।
- भूमिः - भूभूमिरचलानन्ता रसा विश्वम्भरा स्थिरा। धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः।। सर्वंसहा वसुमतिः वसुधोर्वी वसुन्धरा। गोत्रा कुः पृथिवी पृथ्वीक्ष्माऽवनिर्मेदिनी मही।। इत्यमरः।

### पाठगतप्रश्नाः-३

११. कवचकुण्डलदानात् अर्जुनः केन वारितः।

१२. कालविपर्ययात् किं क्षयं गच्छति।

१३. किं चिरं तिष्ठतीति कर्णः आह।

१४. पुरन्दरानुग्रहात् कर्णाय कां शक्तिं ददाति देवदूतः।

१५. देवदूतः केन प्रेषितः।

१६. कः फाल्गुनः।

## १८.१२) नाटकेऽस्मिन् प्रयुक्तानां छन्दसां लक्षणानि -

१. अनुष्टुप् - श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघुपञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।

२. उपजाति - अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।

३. शार्दूलविक्रीडित - सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।

४. मालिनी - ननमयययुतेयं मालिनी भोगिलोकैः।

५. वसन्ततिलका - उक्ता वसन्ततिलका तभजा जगौ गः।

६. प्रहर्षणी - त्र्याशाभिर्मनजरगा प्रहर्षणीयम्।

७. वंशस्थ - जतौ तु वंशस्थमुदीरितं जरौ।

## पाठसारः

- रथम् आरुह्य अर्जुनस्य समीपं स्वस्य रथं नेतुं शल्यराजं निर्दिदेश कर्णः। तदा नेपथ्ये 'महत्तरां भिक्षां याचे' इति कस्यचित् कण्ठरवं श्रुत्वा कर्णः उवाच यत् एषः कण्ठस्वरः श्रीमतः वीर्यवतः च ब्राह्मणस्य, यतो हि धीरनिनादं कण्ठस्वरमिमम् आकर्ण्य अश्वाः चित्रार्पिताः इव स्थिराः संवृत्ताः इति। ततः स विप्रम् आहूतवान्।
- तदा प्रविशति ब्राह्मणरूपधारी शक्रः। शक्रः कथयति- भोः कर्ण, महत्तरां भिक्षां याचे इति। तदा कर्णः तस्य आशीर्वादलाभाय तं प्रशस्य नमस्करोति। शक्रस्तु आत्मगततया चिन्तयति यत् यदि वदामि दीर्घायुः भव इति तर्हि कर्णः दीर्घायुः भविष्यति, यदि तन्न वदामि तर्हि मूढः इति चिन्तयति, तस्मात् किं वदेयमिति न शक्नोमि स्थिरीकर्तुम्। प्रकाश्ये वक्ति यत् हे कर्ण, सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः इति। एतद् आकर्ण्य कर्णः वक्ति यत् हे भगवन्, भवता दीर्घायुः भव इति किं न वक्तव्यम्? अथवा मम कृते एतदेव शोभनम्। यतो हि - केवलं मानवैः धर्मः एव यत्नेन पालनीयः, श्रियः तु सर्पस्य जिह्वा इव चञ्चलाः भवन्ति, तस्मात् प्रजापालनमात्रबुद्ध्या हतेषु देहेषु अपि गुणाः स्थिराः तिष्ठन्ति। वदतु भगवन्, किम् इच्छसि, किम् अहम् ददामि इति। एतत् श्रुत्वा शक्रः वदति यत् महत्तरां भिक्षां याचे इति। कर्णः उक्तवान्- महत्तरां भिक्षां भवते दास्यामि। किं भवान् गोसहस्रम् इच्छति? इति। शक्रः तन्न इच्छति। तस्मात् पुनः कथयति- किं काम्बोजजातं बहुसहस्रम् अश्वम् इच्छति? किं वा बहून् हस्तिनः इच्छति? किम् अपर्याप्तं कनकम् इच्छति? किं वा पृथिवीम् इच्छति? अथवा किम् अग्निष्टोमफलम् इच्छति? एतेषु किमपि न इच्छति शक्रः। तस्मात् कर्णः कथयति - किम् मम शिरः इच्छति भवान्? इति। तदपि न इच्छति शक्रः। तदा सहस्रैः देवासुरैः अपि अभेद्यम् कवचं कुण्डलाभ्यां सह किम् इच्छति भवान्? इति पृष्टवान् कर्णः। तदा शक्रः हर्षेण ददातु ददातु इति उक्तवान्। एतद् कृष्णस्य कूटकार्यमिति विजानन् अपि कर्णः शल्यराजस्य निषेधम् अश्रुत्वा शक्राय कवचकुण्डलं दत्तवान्। उक्तवान् च- कालेन शिक्षा क्षयं याति, वृक्षा अपि कालेन निपतन्ति, जलस्थानगतं जलं च शुष्यति, परन्तु यज्ञे हुतं, दत्तं च न कदापि नाशमेति, सर्वदा तथैव तिष्ठति इति। शक्रः तद् गृहीत्वा हर्षेण प्रस्थितः। शल्यराजः उक्तवान् - भवान् शक्रेण वञ्चितः खलु? कर्णः उक्तवान् यत् शक्र एव तेन वञ्चितः। कुतः?- यः यज्ञे आहुतिप्रदानेन बहुभिः ब्राह्मणैः तृप्यते, किरीटधारी यः दानवान् निहन्ति, स खलु इन्द्रः अद्य कर्णेन उपकृतः।

- अस्मिन् समये देवदूतः तत्र समागम्य निवेदितवान् यत् कवचकुण्डलग्रहणात् पश्चात्तापेन शक्रेण कर्णाय पाण्डवेषु एकपुरुषघातिनी विमला नाम शक्तिः प्रदत्ता। परन्तु कर्णः दत्तस्य प्रतिग्रहणं नाङ्गीकरोति। परन्तु ब्राह्मणवचनं तेन पूर्वं न अतिक्रान्तमिति कारणात् देवदूतेन बोधितः सन् स पुनः शक्तिम् अङ्गीकरोति। पुनश्च तं पृच्छति यत् कदा सा शक्तिः लप्स्यते इति। देवदूतः वदति- यदा स्मरिष्यति तदा लप्स्यते इति। एवं निवेद्य देवदूतः प्रस्थानं करोति। शल्यराजः कर्णेन सह रथम् आरोहति। तस्मिन्नेव समये शङ्खध्वनिं श्रुत्वा कर्णः वदति- कृष्णस्य अथवा अर्जुनस्य तीव्रः शङ्खध्वनिः श्रूयते। मन्ये युधिष्ठिरस्य पराजयं निशम्य अर्जुनः यथाबलं युद्धं करिष्यति। तस्मात् यत्र अर्जुनस्य रथः विद्यते तत्रैव मम रथं नयतु इति। शल्यराजः तथैव आरचति। तदा भरतवाक्यं श्रूयते- संसारे सर्वत्र सर्वदा सम्पदः सन्तु, विपदश्च विनश्यन्तु। राजगुणसम्पन्नः राजा पृथ्वीं प्रशास्तु इति। ततः कर्णः शल्यश्च निष्क्रामतः। नाटकञ्च समाप्तिं गच्छति।

## पाठान्तप्रश्नाः

१. कर्णः कया पाण्डवहननात् वारितः?

२. कवचकुण्डलयोः प्रतिदानरूपेण इन्द्रः कर्णाय किम् प्रदत्तवान्?

३. कर्णः ब्राह्मणाय किम् किम् दातुम् इच्छति स्म।

४. हुतं च दत्तं तथैव तिष्ठति- कर्णवाक्यमिदं विस्तार्यताम्?

५. कर्णस्य कवचकुण्डलदानं संक्षेपेण लिखत।

६. वस्तुतः शक्रः एव कर्णेन वञ्चितः इत्यत्र कर्णस्य का युक्तिः।

७. किं विचिन्त्य कर्णः कवचकुण्डले ददाति।

८. संक्षेपेण नाट्यकारपरिचयः विज्ञाप्यताम्।

९. कवचं कुण्डते कीदृशानि इति कर्णः वदति।

१०. स्तम्भयोः स्थितानां शब्दानां कस्य केन सम्बन्धः इति रेखायोजनेन प्रदर्शयत।

| | |
|---|---|
| १) कर्णः | धनञ्जयः |
| २) शल्यः | नागकेतुः |
| ३) दुर्योधनः | जामदग्न्यः |
| ४) अर्जुनः | पुरन्दरः |
| ५) परशुरामः | दुर्योधनः |
| ६) नागकेतुः | सारथिः |
| ७) शक्रः | अङ्गेश्वरः |

## पाठगतप्रश्नानाम् उत्तराणि

**उत्तराणि-१**

१. सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः।

२. विप्रस्य।

३. दीर्घायुः।

४. कर्णस्य।

५. नृपाणां धनम् सर्पस्य जिह्वा यथा चपला तथा चपलम् इति।

**उत्तराणि-२**

६. सहस्रम्।

७. सहस्रस्य

८. वारणानाम्।

९. अपर्याप्तम्।

१०. जित्वा समग्रां पृथिवीम्।

**उत्तराणि-३**

११. शल्येन।

१२. शिक्षा।

१३. हुतं च दत्तम्।

१४. विमला।

१५. पुरन्दरेण।

१६. अर्जुनः।

॥ इति अष्टादशः पाठः ॥